संक्षिप्तसारोणादिवृत्तिः ॥ पूगकर्त्तरी । जाँती इति भाषा । इति केचित् ॥

शङ्खद्रुमः, पुं, (शङ्खुरिव द्रुमः ।) शालद्रुमः । इति रत्नमाला ॥

शङ्कोचः, पुं, शङ्कुमत्स्यः । इति जटाधरः ॥

शङ्कोचिः, पुं, मत्स्यविशेषः । शाँकोच इति भाषा । यथा,—

"अथ शङ्कुः शङ्कुचिः स्यात् शङ्कोचिः शङ्कुची-
त्यपि ॥"

इति शब्दरत्नावली ॥

शङ्खः, पुं,क्ली, (शाम्यति अशुभमस्मादिति । शम+ "शमेः खः ।" उणा० १ । १०४ । इति खः ।) समुद्रोद्भवजन्तुविशेषः । शाँख इति भाषा । तत्पर्य्यायः । कम्बुः २ । इत्यमरः ॥ कम्बोजः ३ अब्जः ४ जलजः ५ । इति शब्दरत्नावली ॥ अर्णोभवः ६ पावनध्वनिः ७ अन्तःकुटिलः ८ महानादः ९ श्वेतः १० पूतः ११ मुखरः १२ दीर्घनादः १३ बहुनादः १४ हरिप्रियः १५ । अस्य गुणाः । कटुरसत्वम् । शीतत्वम् । पुष्टि-वीर्य्यबलप्रदत्वम् । गुल्मशूलकफश्वासविषदोषना-शित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"कम्बुशङ्खनखश्चापि शुक्तिशम्बूककर्कटाः ।
जीवा एवंविधाश्चान्ये कोषस्थाः परिकीर्त्तिताः ॥
कोषस्था मधुराः स्निग्धाः पित्तवातहरा हिमाः ।
बृंहणा बहुवर्च्चस्का वृष्याश्च बलवर्द्धनाः ॥"

इति भावप्रकाशः ॥

अन्यच्च ।

"शङ्खोदधिमलौ शीतौ कषायावतिलेखनौ ।"

इति राजवल्लभः ॥*॥

अस्योत्पत्त्यादिर्यथा ।

"अथ शम्भुर्हरेः शूलं जग्राह दानवं प्रति ।
ग्रीष्ममध्याह्नमार्त्तण्डशतकवचसुत्तमम् ॥
शूलञ्च भ्रमणं कृत्वा पपात दानवोपरि ।
चकार भस्मसात्तञ्च सरथञ्चावलीलया ॥
स शिवस्तेन शूलेन दानवस्यास्थिजालकम् ।
प्रेम्णा च प्रेरयामास लवणोदे च सादरम् ॥
अस्थिभिः शङ्खचूड़स्य शङ्खजातिर्बभूव ह ।
नानाप्रकाररूपा च शश्वत्पूता सुरार्च्चने ॥
प्रशस्तं शङ्खतोयञ्च देवानां प्रीतिदं परम् ।
तीर्थतोयस्वरूपञ्च पवित्रं शम्भुना विना ॥
शङ्खशब्दो भवेद्यत्र तत्र लक्ष्मीश्च सुस्थिरा ।
स स्नातः सर्व्वतीर्थेषु यः स्नातः शङ्खवारिणा ॥
शङ्खे हरेरधिष्ठानं यतः शङ्खस्ततो हरिः ।
तत्रैव सततं लक्ष्मीर्दूरीभूतममङ्गलम् ॥
स्त्रीणाञ्च शङ्खध्वनिभिः शूद्राणाञ्च विशेषतः ।
भीता रुष्टा याति लक्ष्मीः स्थलमन्यत् स्थला-
न्ततः ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः ॥*॥

अथ शङ्खमाहात्म्यम् ।

ब्रह्मोवाच ।

"शृणु शङ्खस्य माहात्म्यं सर्व्वपापहरं शुभम् ॥
कपिलाक्षीरमादाय शङ्खे कृत्वा जनार्द्दनम् ।
यज्ञायुतसहस्रस्य स्नापयित्वा लभेत् फलम् ॥
पर्व्वस्विन्याः शुभं क्षीरं शङ्खे कृत्वा तु नारद ।
यः स्नापयति देवेशं स गच्छेद्ब्रह्मणः पदम् ॥
क्षिप्त्वा गङ्गोदकं शङ्खे यः स्नापयति माधवम् ।
नमो नारायणेत्युक्त्वा मुच्यते योनिसङ्कटात् ॥
शङ्खस्थन्तु यत्तोयं भ्रमितं केशवोपरि ।
निःक्षिपेन्मूर्द्ध्नि सततं गङ्गास्नानेन तस्य किम् ॥
कृत्वा पादोदकं शङ्खे वैष्णवाय प्रयच्छति ।
तिलमिश्रं तुलस्या च चान्द्रायणफलं लभेत् ॥
नदीतड़ागजं वारि वापीकूपह्रदोद्भवम् ।
गाङ्गेयं तद्भवेत् सर्व्वं कृतं शङ्खे हरिप्रिय ॥
गृहीत्वा विष्णुपादाम्बु शङ्खे कृत्वा च वैष्णवः ।
यो वहेत् शिरसा नित्यं स मुने तापसोत्तमः ॥
त्रैलोक्ये यानि तीर्थानि वासुदेवाज्ञया मुने ।
शङ्खं तान्यधितिष्ठन्ति तस्मात् शङ्खं सदार्च्चयेत् ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्व्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ॥
पुरतो वासुदेवस्य सपुष्पफलचन्दनैः ।
शङ्खः समर्च्चितो येन तस्य लक्ष्मीर्न दुर्लभा ॥
दर्शनेनापि शङ्खस्य किमु तस्यार्च्चनेन च ।
विलयं यान्ति पापानि हिमः सूर्य्योदये यथा ॥
गर्भा देवारिनारीणां विनश्यन्ति सहस्रधा ।
तव नादेन पाताले पाञ्चजन्य नमोऽस्तु ते ॥
तीर्थोदकं हरेर्मूर्द्ध्नि भ्रामयेत् शङ्खसंस्थितम् ।
ददाति मुक्तिं देवेशः क्षीरसागरजाप्रियः ॥
यमदूताश्च कुष्माण्डपिशाचोरगराक्षसाः ।
दृष्ट्वा शङ्खोदकं मूर्द्ध्नि भीता यान्ति दिशो दश ॥
नित्ये नैमित्तिके काम्ये स्नानार्च्चनविलेपने ।
शङ्खं समर्च्चयति यः श्वेतद्वीपे वसेद्धि सः ॥"

इति पाद्मोत्तरखण्डे १२९ अध्यायः ॥ * ॥

अथ दक्षिणावर्त्तशङ्खमाहात्म्यम् ।

"दक्षिणावर्त्तशङ्खेन गत्वा प्राक्स्रोतसं नदीम् ।
स्नात्वाभिषेकं विधिवत् ततः पापैः प्रमुच्यते ॥
दक्षिणावर्त्तशङ्खेन तिलमिश्रोदकेन तु ।
उदके नाभिमात्रे तु यः कुर्य्यादभिषेचनम् ॥
प्राक्स्रोतस्यां तु वै नद्यां नरस्तत्राभ्यसाप्लुतः ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥
दक्षिणावर्त्तशङ्खेन पापशीर्षं करे स्थितम् ।
उदकं यः प्रतीच्छेत शिरसा हृष्टमानसः ॥
तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति ।
न शङ्खेन पिबेत्तोयं न हन्यात्कूर्म्मशूकरौ ॥"

इति वाराहे प्रबोधनीमाहात्म्याध्यायः ॥*॥

दक्षिणावर्त्तशङ्खतोयेन विष्णुपूजाफलं यथा । स्कान्दे ।

"दक्षिणावर्त्तशङ्खस्य तोयेन योऽर्च्चयेद्धरिम् ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥"

इत्याह्निकाचारतत्त्वम् ॥

स च शङ्खः रत्नविशेषः । तल्लक्षणादि यथा,—

"क्षीरोदकूलेऽपि सुराष्ट्रदेशे
तदन्यतोऽपि प्रभवन्ति शङ्खाः ।
अवक्रवर्णाः शशिशुभ्रभासः
सुसूक्ष्मवक्त्रा गुरवो महान्तः ॥
ते वामदक्षिणावर्त्तभेदेन द्विविधा मताः ।
दक्षिणावर्त्तशङ्खस्तु कुर्य्यादायुर्यशो धनम् ॥
तेनैव शिरसा यस्तु श्रद्दधानः प्रतीच्छति ।
वारि हित्वा स पापानि पुण्यमाप्नोति मानवः ॥
वृत्तत्वं स्निग्धताच्छत्वं शङ्खस्येति गुणत्रयम् ।
आवर्त्तभङ्गदोषो हि हेमयोगाद्विनश्यति ॥
ब्रह्मादिजातिभेदेन स पुनस्तु चतुर्व्विधः ॥"*॥

इति युक्तिकल्पतरुः ॥

श्रीकृष्णार्ज्जुनादिशङ्खनामानि यथा,—

"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥"

इति श्रीभगवद्गीतायाम् १ अध्यायः ॥

अयन्तु रणवाद्यविशेषः । यथा,—

"भक्ततूर्य्यं गन्धतूर्य्यं रणतूर्य्यं महास्वनः ।
संग्रामपटहः शङ्खस्तथा चाभयडिण्डिमः ॥
महाद्वन्दो कृपाभीरुर्भीरुः कोलाहलोऽपि च ।
युद्धवाद्यस्य पर्य्यायश्चान्ये भेदाः शलादयः ॥"

इति शब्दरत्नावली ॥

ललाटास्थि । (यथा, सुश्रुते । १ । ५ ।
"तत्र भ्रूगण्डशङ्खललाटाक्षिपुटौष्ठदन्तवेष्टकक्षा-कुक्षिवङ्क्षणेषु तिर्य्यक्छेद उक्तः ॥") कुबेरस्य निधिविशेषः । (यथा, महाभारते । २ । १० । ३६ ।

"निधिप्रवरमुख्यौ च शङ्खपद्मौ धनेश्वरौ ।"

यथा च मार्कण्डेये । ६८ । ४२—४५ ।

"रजस्तमोमयश्चान्यः शङ्खसंज्ञो हि यो निधिः ।
तेनापि नीयते विप्र तद्गुणित्वं निधीश्वरः ॥
एकस्यैव भवत्येष नरं नान्यमुपैति च ।
यस्य शङ्खो निधिस्तस्य स्वरूपं क्रौष्टुके शृणु ॥
एक एवात्मना मृष्टमन्नं भुङ्क्ते तथाम्बरम् ।
कदन्नभुक् परिजनो न च शोभनवस्त्रधृक् ॥
न ददाति सुहृद्भार्य्या भ्रातृपुत्त्रस्नुषादिषु ।
स्वपोषणपरः शङ्खी नरो भवति सर्व्वदा ॥")

नखीनामगन्धद्रव्यम् । इत्यमरमेदिनीकारौ ॥ (यथा, सुश्रुते । ६ । १७ ।

"मनःशिला त्र्यूषणशङ्खमाक्षिकैः
ससिन्धुकासीसरसाञ्जनैः क्रिया ॥")

कर्णसमीपास्थि । इति राजनिर्घण्टः ॥ (यथा, याज्ञवल्क्ये । ३ । ८६ ।

"कर्णौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे ॥")

अष्टनागनायकान्तर्गतनागविशेषः । (यथा, मनसापूजापद्धतौ ।

"अनन्तो वासुकिः पद्मो महापद्मस्तु तक्षकः ।
कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकी-
र्त्तिताः ॥")

हस्तिदन्तमध्यम् । इति त्रिकाण्डशेषः ॥ दश-निखर्व्वसंख्या । लक्षकोटिरिति यावत् । यथा,

"एकं दशशतञ्चैव सहस्रमयुतं तथा ।
लक्षञ्च नियुतं चैव कोटिरर्व्वुदमेव च ॥
वृन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः ।